শ্রীঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।
ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

শ্রী মেল্পপত্তূর্ নারাযণভট্টতিরি ৱিরচিতম্

# ॥শ্রীমন্নারাযণীযম্॥

## দশক - ৬৮

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using Bengali for TEX.

শ্ৰীঃ
শ্ৰীমতে কৃষ্ণায পরব্ৰহ্মণে নমঃ
শ্ৰীমতে রামানুজায নমঃ

# ॥শ্ৰীমন্নারাযণীযম্ ॥

## দশক - ৬৮

*রাসক্ৰীডাযাং আনন্দপারৱশ্যৱর্ণনং*
*প্ৰণযকোপৱর্ণনং ভৱতকৃতসান্ত্ৱনাৱর্ণনং চ*

তৱ ৱিলোকনাদগোপিকাজনাঃ
    প্ৰমদসঙ্কুলাঃ পঙ্কজেক্ষণ।
অমৃতধারযা সম্পলুতা ইৱ
    স্তিমিততাং দধুস্তৱতপুরোগতাঃ॥ ১ ॥

তদনু কাচন ত্ৱতকরাম্বুজং
    সপদি গৃহ্ণতী নির্ৱিশঙ্কিতম্।
ঘনপযোধরে সন্নিধায সা
    পুলকসংৱৃতা তস্থুষী চিরম্॥ ২ ॥

তৱ ৱিভোপরা কোমলং ভুজং
    নিজগলান্তরে পর্যৱেষ্টযত্।
গলসমুদ্গতং প্ৰাণমারুতং
    প্ৰতিনিরুন্ধতীৱাতিহর্ষুলা॥ ৩ ॥

অপগতত্ৰপা কাপি কামিনী
    তৱ মুখাম্বুজাত্ পূগচর্ৱিতম্।
প্ৰতিগৃহয্য তদ্ৱক্ত্ৰপঙ্কজে
    নিদধতী গতা পূর্ণকামতাম্॥ ৪ ॥

ৱিকরুণো ৱনে সংৱিহায মা-
    মপগতোসি কা ত্ৱামিহ স্পৃশেত্।
ইতি সরোষযা তাৱদেকযা
    সজললোচনং ৱীক্ষিতো ভৱান্॥ ৫ ॥

www.prapatti.com

ইতি মুদাকুলৈর্ৱল্লৱীজনৈঃ
সমমুপাগতো যামুনে তটে।
ভৃদুকুচাম্বৰৈঃ কল্পিতাসনে
ঘুসৃণভাসুরে পৰ্যশোভথাঃ॥ ৬॥

কতিৱিধা কৃপা কেপি সৰ্ৱতো
ধৃতদয়োদয়াঃ কেচিদাশ্ৰিতে।
কতিচিদীদৃশা মাদৃশেষ্ৱপী-
ত্যভিহিতো ভৱান্ ৱল্লৱীজনৈঃ॥ ৭॥

অয়ি কুমাৰিকা নৈৱ শঙ্ক্যতাং
কঠিনতা ময়ি প্ৰেমকাতৰে।
ময়ি তু চেতসো ৱোনুৱৃত্তয়ে
কৃতমিদং ময়েত্যূচিৱান্ ভৱান্॥ ৮॥

অয়ি নিশম্যতাং জীৱৱল্লভাঃ
প্ৰিয়তমো জনো নেদৃশো মম।
তদিহ ৰম্যতাং ৰম্যযামিনী-
ষ্ৱনুপৰোধমিত্যালপো ৱিভো॥ ৯॥

ইতি গিৰাধিকং মোদমেদুৰৈ-
ৰ্ৱ্ৰজৱধূজনৈঃ সাকমাৰমন্।
কলিতকৌতুকো ৰাসখেলনে
গুৰুপুৰীপতে পাহি মাং গদাত্॥ ১০॥

**********

www.prapatti.com